श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमदान्ध्रपूर्ण विरचितं

# ॥ श्रीरामानुजाष्टोत्तरशतनामस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीरामानुजाष्टोत्तरशतनामस्तोत्रम् ॥

रामानुजः पुष्कराक्षो यतीन्द्रः करुणाकरः।
कान्तिमत्यात्मजः श्रीमान् लीलामानुषविग्रहः॥ १ ॥

सर्वशास्त्रार्थतत्वज्ञः सर्वज्ञस्सज्जनप्रियः।
नारायणकृपापात्रं श्रीभूतपुरनायकः॥ २ ॥

अनघो भक्तमन्दारः केशवानन्दवर्धनः।
काञ्चीपूर्णप्रियसखः प्रणतार्तिविनाशकः॥ ३ ॥

पुण्यसङ्कीर्तनः पुण्यो ब्रह्मराक्षसमोचकः।
यादवापादितापार्थ वृक्षच्छेदकुठारकः॥ ४ ॥

अमोघो लक्ष्मणमुनिः शारदाशोकनाशनः।
निरन्तरजनाज्ञान निर्मोचनविचक्षणः॥ ५ ॥

वेदान्तद्वयसारज्ञो वरदाम्बुप्रदायकः।
पराभिप्रायतत्वज्ञो यामुनाङ्गुळिमोचकः॥ ६ ॥

देवराजकृपालब्ध षड्वाक्यार्थमहोदधिः।
पूर्णार्यलब्धसन्मन्त्रश्शौरिपादाब्जषट्पदः॥ ७ ॥

त्रिदण्डधारी ब्रह्मज्ञो ब्रह्मध्यानपरायणः।
रङ्गेशकैङ्कर्यरतो विभूतिद्वयनायकः॥ ८ ॥

गोष्ठीपूर्णकृपालब्ध मन्त्रराजप्रकाशकः।
वररङ्गानुकम्पात्त द्राविडाम्नाय पारगः॥ ९ ॥

मालाधरार्यसुज्ञात द्राविडाम्नाय तत्त्वधीः।
चतुस्सप्ततिशिष्याढ्यः पञ्चाचार्यपदाश्रयः॥ १० ॥

प्रपीत विषतीर्थाम्भः प्रकटीकृतवैभवः।
प्रणतार्तिहराचार्य दत्तभिक्षैकभोजनः॥ ११ ॥

पवित्रीकृतकूरेशो भागिनेयत्रिदण्डकः।
कूरेशदाशरथ्यादि चरमार्थ प्रकाशकः॥ १२ ॥

रङ्गेश वेङ्कटेशादि प्रकटीकृतवैभवः।
देवराजार्चनरतो मूकमुक्तिप्रदायकः॥ १३ ॥

यज्ञमूर्तिप्रतिष्ठाता मन्नाथो धरणीधरः।
वरदाचार्यसद्भक्तो यज्ञेशार्तिविनाशकः॥ १४ ॥

अनन्ताभीष्टफलदो विठलेन्द्रप्रपूजितः।
श्रीशैलपूर्णकरुणालब्धरामायणार्थकः॥ १५ ॥

प्रपत्तिधर्मैकरतो गोविन्दार्यप्रियानुजः।
व्याससूत्रार्थतत्त्वज्ञो बोधायन मतानुगः॥ १६ ॥

श्रीभाष्यादि महाग्रन्थकारकः कलिनाशनः।
अद्वैतमतविच्छेत्ता विशिष्टाद्वैत पारगः॥ १७ ॥

कुरङ्गनगरीपूर्णमन्त्ररत्नोपदेशकः।
विनाशिताखिलमतश्शेषीकृतरमापतिः॥ १८ ॥

पुत्रीकृतशठारातिश्शठजिदृणमोचकः।
भाषादत्तहयग्रीवो भाष्यकारो महायशाः॥ १९ ॥

पवित्रीकृतभूभागः कूर्मनाथप्रकाशकः।
श्रीवेङ्कटाचलाधीश शङ्खचक्रप्रदायकः॥ २० ॥

श्रीवेङ्कटेशश्वशुरश्श्रीरमासखदेशिकः।
कृपामात्रप्रसन्नार्यो गोपिकामोक्षदायकः॥ २१ ॥

समीचीनार्यसच्छिष्य सत्कृतो वैष्णवप्रियः।
क्रिमिकण्ठनृपध्वंसी सर्वमन्त्रमहोदधिः॥ २२ ॥

अङ्गीकृतान्ध्रपूर्णार्यस्सालग्रामप्रतिष्ठितः।
श्रीभक्तग्रामपूर्णेशो विष्णुवर्धनरक्षकः॥ २३ ॥

बौद्धध्वान्तसहस्रांशुश्शेषरूपप्रदर्शकः।
नगरीकृतवेदाद्रिः डिल्लीश्वरसमर्चितः॥ २४ ॥

नारायणप्रतिष्ठाता सम्पत्पुत्रविमोचकः।
सम्पत्कुमारजनकस्साधुलोकशिखामणिः॥ २५ ॥

सुप्रतिष्ठितगोविन्दराजः पूर्णमनोरथः।
गोदाग्रजो दिग्विजेता गोदाभीष्टप्रपूरकः॥ २६ ॥

सर्वसंशयविच्छेत्ता विष्णुलोकप्रदायकः।
अव्याहतमहद्वर्त्मा यतिराजो जगद्गुरुः॥ २७ ॥

एवं रामानुजार्यस्य नाम्नामष्टोत्तरं शतम्।
यः पठेच्छृणुयाद्वापि सर्वान् कामानवाप्नुयात्॥ २८ ॥

यदान्ध्रपूर्णेन महात्मनेदं स्तोत्रं कृतं सर्वजनावनाय।
तज्जीवभूतं भुवि वैष्णवानां बभूव रामानुजमानसानाम्॥ २९ ॥

॥ इति श्रीरामानुजाष्टोत्तरशतनामस्तोत्रम् सम्पूर्णम् ॥